# Skanda Upanishad

# સ્કન્દોપનિષત્ ૫૧

## Document Information

Text title : skanda Upanishad

File name : skandaupan.itx

Category : upanishhat, subrahmanya

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 51/108; Krishna-Yajur-Veda, Samanya Upanishad

Latest update : October 11, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સ્કન્દોપનિષત્ ૫૧

યત્રાસંભવતાં યાતિ સ્વાતિરિક્તભિદાતતિઃ । ।
સંવિન્માત્રં પરં બ્રહ્મ તત્સ્વમાત્રં વિજૃમ્ભતે ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અચ્યુતોઽસ્મિ મહાદેવ તવ કારુણ્યલેશતઃ ।
વિજ્ઞાનઘન એવાસ્મિ શિવોઽસ્મિ કિમતઃ પરમ્ ॥ ૧॥

ન નિજં નિજવદ્ભાતિ અન્તઃકરણજૃમ્ભણાત્ ।
અન્તઃકરણનાશેન સંવિન્માત્રસ્થિતો હરિઃ ॥ ૨॥

સંવિન્માત્રસ્થિતશ્ચાહમજોઽસ્મિ કિમતઃ પરમ્ ।
વ્યતિરિક્તં જડં સર્વં સ્વપ્નવચ્ચ વિનશ્યતિ ॥ ૩॥

ચિજ્જડાનાં તુ યો દ્રષ્ટા સોઽચ્યુતો જ્ઞાનવિગ્રહઃ ।
સ એવ હિ મહાદેવઃ સ એવ હિ મહાહરિઃ ॥ ૪॥

સ એવ હિ જ્યોતિષાં જ્યોતિઃ સ એવ પરમેશ્વરઃ ।
સ એવ હિ પરં બ્રહ્મ તદ્બ્રહ્માહં ન સંશયઃ ॥ ૫॥

જીવઃ શિવઃ શિવો જીવઃ સ જીવઃ કેવલઃ શિવઃ ।
તુષેણ બદ્ધો વ્રીહિઃ સ્યાત્તુષાભાવેન તણ્ડુલઃ ॥ ૬॥

એવં બદ્ધસ્તથા જીવઃ કર્મનાશે સદાશિવઃ ।
પાશબદ્ધસ્તથા જીવઃ પાશમુક્તઃ સદાશિવઃ ॥ ૭॥

શિવાય વિષ્ણુરૂપાય શિવરૂપાય વિષ્ણવે ।
શિવસ્ય હૃદયં વિષ્ણુઃ વિષ્ણોશ્ચ હૃદયં શિવઃ ॥ ૮॥

યથા શિવમયો વિષ્ણુરેવં વિષ્ણુમયઃ શિવઃ ।

યથાન્તરં ન પશ્યામિ તથા મે સ્વસ્તિરાયુષિ ॥ ૯॥

યથાન્તરં ન ભેદાઃ સ્યુઃ શિવકેશવયોસ્તથા ।
દેહો દેવાલયઃ પ્રોક્તઃ સ જીવઃ કેવલઃ શિવઃ ॥ ૧૦॥

ત્યજેદજ્ઞાનનિર્માલ્યં સોઽહંભાવેન પૂજયેત્ ।
અભેદદર્શનં જ્ઞાનં ધ્યાનં નિર્વિષયં મનઃ ।
સ્નાનં મનોમલત્યાગઃ શૌચમિન્દ્રિયનિગ્રહઃ ॥ ૧૧॥

બ્રહ્મામૃતં પિબેદ્ભૈક્ષ્યમાચરેદ્દેહરક્ષણે ।
વસેદેકાન્તિકો ભૂત્વા ચૈકાન્તે દ્વૈતવર્જિતે ।
ઇત્યેવમાચરેદ્ધીમાન્સ એવં મુક્તિમાપ્નુયાત્ ॥ ૧૨॥

શ્રીપરમધામ્ને સ્વસ્તિ ચિરાયુષ્યોન્નમ ઇતિ ।
વિરિઞ્ચિનારાયણશઙ્કરાત્મકં નૃસિંહ દેવેશ તવ
પ્રસાદતઃ ।
અચિન્ત્યમવ્યક્તમનન્તમવ્યયં વેદાત્મકં બ્રહ્મ નિજં વિજાનતે
॥ ૧૩॥

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥ ૧૪॥

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે । વિષ્ણોર્યત્પરમં
પદમ્ ।
ઇત્યેતન્નિર્વાણાનુશાસનમિતિ વેદાનુશાસનમિતિ
વેદાનુશાસનમિત્યુપનિષત્ ॥ ૧૫॥

॥ ઇતિ કૃષ્ણયજુર્વેદીય સ્કન્દોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Skanda Upanishad*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*